हिरण्यष्ठ्यूः। 'असिद्धं बहिरङ्गमन्तरङ्गे' (व्या. प. ४२) इति [1]नाजानन्तर्ये (व्या. प. ४६) इति प्रतिषिध्यते। झलादौ[2] छस्य – पृष्टः। पृष्टवान्। पृष्ट्वा। वकारस्य – द्यूतः। द्यूतवान्। द्यूत्वा। क्ङिति इत्येव, द्युभ्यास्। द्युभिः।

केचिदत्र क्ङिति इति नानुवर्तयन्ति। कथं द्युभ्याम्, द्युभिः इति ऊठि कृते? 'दिव उत्' (६.१.१३१/३३७) इति [3]तपरत्वान् मात्राकालो भविष्यति[4]। [5]छशां षः (८.२.३६/२९४) इत्यत्र छग्रहणं न कर्तव्यम्[6]। अनेनैव हि सर्वत्र शकारो [7]विधीयते। ऊठष्ठित्करणम् 'एत्यधत्यूठ्सु' (६.१.८९/७३) इति विशेषणार्थम्। 'वाह ऊठ्' (६.४.१३२/३२९) इत्ययमपि ठिदेव॥

## ज्वरत्वरस्रिव्यविमवामुपधायाश्च। (२०/२६५४)

ज्वर त्वर स्रिवि अव मव इत्येतेषामङ्गानां वकारस्य उपधायाश्च स्थाने ऊठ् इत्ययमादेशो भवति क्वौ परतोऽनुनासिके झलादौ च क्ङिति। जूः, जुरौ, जुरः। जूर्तिः[8]। त्वर – तूः, तुरौ, तुरः[9]। तूर्तिः। स्रिवि- स्रूः, स्रुवौ, स्रुवः। स्रूतः। स्रूतवान्। स्रूतिः। अव – ऊः, उवौ, उवः[10]। ऊतिः। मव – मूः, मुवौ, मुवः। मूतः। मूतवान्। मूतिः। ज्वरत्वरोपधा वकारात् परा, स्रिव्यवमवां [11]पूर्वा॥

## राल्लोपः। (२१/२६५५)

[12]रेफादुत्तरयोः छ्वोर्लोपो भवति क्वौ परतो झलादौ क्ङिति च[13] परतः। [14]मुर्च्छा–मूः, मुरौ, मुरः। मूर्तः। मूर्तवान्। मूर्तिः। 'न ध्याख्यापॄमूर्छिमदाम्' (८.२.५७/३०४०) इति निष्ठानत्वाभावः। हुर्च्छा – हूः, हुरौ, हुरः। हूर्णः। हूर्णवान्। हूर्तिः। राल्लोपे सतुक्कस्य छस्याभावात् केवलो गृह्यते। वकारस्य – तुर्वी – तूः, तुरौ, तुरः। तूर्णः। तूर्णवान्। तूर्तिः। धुर्वी – धूः, धुरौ, धुरः। धूर्णः। धूर्णवान्। धूर्तिः॥

## असिद्धवदत्रा भात्। (२२/२१८३)

असिद्धवत् इत्ययमधिकारः[15]। यदित ऊर्ध्वमनुक्रमिष्यामः आ अध्यायपरिसमाप्तेः [16]तद् असिद्धवत् [17]भवतीत्येवं वेदितव्यम्। आ भात् इति विषयनिर्देशः। आभसंशब्दनाद् यदुच्यते तत्र कर्तव्ये[18]। अत्र इति समानाश्रयत्वप्रतिपत्त्यर्थम्। तच्चेदत्र [19]यत्र भवति [20]तदा भात् शास्त्रीयं [21]विधीयते तदाश्रयमेव भवति। व्याश्रयं तु नासिद्धवद् भवति इत्यर्थः। [22]असिद्धवचनमुत्सर्गलक्षणभावार्थम्, आदेशलक्षणप्रतिषेधार्थं च। एधि, शाधि इत्यत्र एत्वशाभावयोः [23]कृतयोः झल्लक्षणं धित्वं न प्राप्नोति, असिद्धत्वाद् भवति। आगहि, जहि इत्यत्र अनुनासिक-लोपे जभावे च[24] 'अतो हेः' (६.४.१०५/२२०२) इति लुक् प्राप्नोति, असिद्धत्वान्न भवति। आ भात् इति किम्? अभाजि। रागः। 'अत उपधायाः' (७.२.११६/२२८२) इति वृद्धौ कर्तव्यायां नलोपो नासिद्धो भवति। अत्रग्रहणं किम्? पपुषः पश्य। चिच्युषः पश्य। लुलुवुषः पश्य। [25]वसुसंप्रसारणम् आल्लोपे यणादेशे [26]उवङादेशे च कर्तव्ये नासिद्धं भवति। आल्लोपादीनि [27]वसौ, वस्वन्तस्य विभक्तौ संप्रसारणम् इति समानाश्रयत्वं

---

1. न अजन्तार्थ क. 2. ङिति इत्यधिकम् ब. 3. तपरकरणात् ब. 4. इति इत्यधिकम् ब. 5. तेषाम् इत्यधिकम् ब. ड. 6. भवति इत्यधिकम् फ. 7. भविष्यति फ. 8. जूर्णः जूर्णवान् इत्यधिकम् ब. क. 9. तूर्णः तूर्णवान् इत्यधिकम् ब. क. फ. ह. 10. ऊतवान् इत्यधिकम् ब. क. 11. उपधा इत्यधिकम् फ. 12. छ्वोः इति वर्तते इत्यधिकम् फ. 13. च नास्ति फ, परतः नास्ति क. 14. मुर्च्छा नास्ति ह. 15. अयम् इत्यधिकम् फ. 16. तद् नास्ति फ. 17. भवति इति एतद् ह. 18. इति इत्यधिकम् फ. 19. यद् ड. 20 तत् फ. 21. कार्यम् फ. ह. 22. असिद्धवद् ड. 23. कृतयोः नास्ति फ. 24. कृते इत्यधिकम् क. फ. 25. क्वसु ब, वसोः ह. 26. उवङादेशे नास्ति फ. 27. क्वसावत्र ड. फ.